# श्री हनुमन्नमस्कारः

# ŚRĪ HANUMANNAMASKĀRAḤ

गोष्पदीकृतवारीशं मशकीकृतराक्षसम् ।
रामायणमहामालारत्नं वन्देऽनिलात्मजम् ॥ १ ॥

goṣpadī-kṛta-vārīśaṃ maśakī-kṛta-rākṣasam |
rāmāyaṇa-mahāmālā-ratnaṃ vande'nilātmajam || 1 ||

अञ्जनानन्दनंवीरं जानकीशोकनाशनम् ।
कपीशमक्षहन्तारं वन्दे लङ्काभयङ्करम् ॥ २ ॥

añjanā-nandanaṃ-vīraṃ jānakī-śoka-nāśanam |
kapīśamakṣa-hantāraṃ vande laṅkā-bhayaṅkaram || 2 |

महाव्याकरणाम्भोधिमन्थमानसमन्दरम् ।
कवयन्तं रामकीर्त्या हनुमन्तमुपास्महे ॥ ३ ॥

mahā-vyākaraṇāmbhodhi-mantha-mānasa-mandaram |
kavayantaṃ rāma-kīrtyā hanumantamupāsmahe || 3 ||

उल्लङ्घ्य सिन्धोः सलिलं सलीलं
यः शोकवह्निं जनकात्मजायाः ।
आदाय तेनैव ददाह लङ्कां
नमामि तं प्राञ्जलिराञ्जनेयम् ॥ ४ ॥

ullaṅghya sindhoḥ salilaṃ salīlaṃ
yaḥ śoka-vahniṃ janakātmajāyāḥ |
ādāya tenaiva dadāha laṅkāṃ
namāmi taṃ prāñjalirāñjaneyam || 4 ||

मनोजवं मारुततुल्यवेगं
जितेन्द्रियं बुद्धिमतां वरिष्ठम् ।
वातात्मजं वानरयूथमुख्यं
श्रीरामदूतं शिरसा नमामि ॥ ५ ॥

manojavaṃ māruta-tulya-vegaṃ
jitendriyaṃ buddhimatāṃ variṣṭham |
vātātmajaṃ vānara-yūtha-mukhyaṃ
śrīrāma-dūtaṃ śirasā namāmi || 5 ||

आञ्जनेयमतिपाटलाननं
काञ्चनाद्रिकमनीयविग्रहम् ।
पारिजाततरुमूलवासिनं
भावयामि पवमाननन्दनम् ॥ ६ ॥

āñjaneyamatipāṭalānanaṃ
kāñcanādri-kamanīya-vigraham |
pārijāta-taru-mūla-vāsinaṃ
bhāvayāmi pavamāna-nandanam || 6 ||

यत्र यत्र रघुनाथ-कीर्तनं
तत्र तत्र कृतमस्तकाञ्जलिम् ।
बाष्पवारिपरिपूर्णलोचनं
मारुतिं नमत राक्षसान्तकम् ॥ ७ ॥

yatra yatra raghunātha-kīrtanaṃ
tatra tatra kṛta-mastakāñjalim |
bāṣpa-vāri-paripūrṇa-locanaṃ
mārutiṃ namata rākṣasāntakam || 7 ||